# Shristhala Devi Arati

# श्रीस्थलदेवीआरतिक्यम्

## Document Information

Text title : Shristhala Devi Arati

File name : shrIsthaladevIAratI.itx

Category : devii, devI, AratI

Location : doc_devii

Transliterated by : Vani V vanirvs at gmail.com

Proofread by : Vani V vanirvs at gmail.com

Latest update : October 31, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 31, 2020

*sanskritdocuments.org*

# श्रीस्थलदेवीआरतिक्यम्

यत्कर्म-धर्म-निलयं प्रवदन्ति तज्ज्ञाः
यज्ञादि पुण्यमखिलं सकलं त्वयैव ।
त्वं चेतना यत इति प्रविचार्य चित्ते
नित्यं त्वदीय चरणौ शरणं प्रपद्ये ॥ १॥

पाथोऽधिनाथ तनया पतिरेष शेष
पर्यङ्क लालित वपुः पुरुषः पुराणः ।
त्वन्मोह-पाश-विवशो जगदम्बसोऽपि
व्याघूर्णमाननयनः शयनं चकार ॥ २॥

तत कौतुकं जननि यस्य जनार्दनस्य
कर्णप्रसूतमलजौ मधु-कैटभाख्यौ ।
तस्यापि यौ न भवतः सुलभौ निहन्तुं
त्वन्मायया कविलतौ विलयं गतौ तौ ॥ ३॥

यन्माहिषं वपुरपूर्वबलोपपन्नं
यन्नाक नायक पराक्रम जित्वरं च ।
यल्लोकशोकजननव्रतबद्ध-हार्दं
तल्लीलयैव दलितं गिरिजे भवत्या ॥ ४॥

यो धूम्रलोचन इति प्रथितः पृथिव्यां
भस्मी बभूव स रणे तव हुङ्कृतेन ।
सर्वासुरक्षयकरे गिरिराजकन्ये मन्ये
स्वमन्यु दहने कृत एष होमः ॥ ५॥

केषामपि त्रिदशनायक पूर्वकाणां
हन्तुं न जातु सुलभाविति चण्डमुण्डौ ।
तौ दुर्मदौ सपदि चाम्बर तुल्यमूर्ते
मतिस्तवासिकुलिशात् पतितौ विशीर्णौ ॥ ६॥

दौत्येन ते शिव इति प्रथितप्रभावो
देवोऽपि दानवपतेः सदनं जगाम ।
भूयोऽपि तस्य चरितं प्रथयाञ्चकार
सा त्वं प्रसीद शिवदूति विजृम्भितेन ॥ ७॥

चित्रं तदेतदमरैरपि ये न जेयाः
शस्त्राभिघात-पतिताद्रुधिरादपर्णे ।
भूमौ बभूवुरमिताः प्रतिरक्तबीजा
स्तेऽपित्वयैव गगने गलिताः समस्ताः ॥ ८॥

आश्चर्यमेतदतुलं यद्भूत् सुरारी
त्रैलोक्यवैभवविलुण्ठनहृष्टपाणी ।
शस्त्रैर्निहत्य भुवि शुम्भ-निशुम्भसंज्ञौ
नीतौ त्वया जननि तावपि नाकलोकम् ॥ ९॥

त्वत्तेजसि प्रलयकाल हुताशनेऽस्मिं-
स्तस्मिन् प्रयान्ति विलयं भुवनानि सद्यः ।
तस्मिन्निपत्य शलभा इव दानवेन्द्रा
भस्मी भवन्ति हि भवानि किमत्र चित्रम् ॥ १०॥

तत्किं गृणामि भवतीं भव तीव्रताप
निर्वापण-प्रणयनीं प्रणमज्जनेषु ।
तत्किं गृणामि भवन्ती भव तीव्र ताप
संवर्द्धन-प्रणयनीं विपदि स्थितेषु ॥ ११॥

वामे करे तदितरे च तथोपरिष्ठान्
पात्रं सुधारसयुतं वरमातुलुङ्गम् ।
खेटं गदां च दधतीं भवतीं भवानि
ध्यायन्ति येऽरुणनिभां कृतिनस्त एव ॥ १२॥

यद्वारुणात् परमिदं यदि मानवास्ते
बीजं स्मरेदनुदिनं दहनाधिरूढम् ।
मायाङ्कितं तिलकितं तरुणेन्दु बिन्दु-
र्नादैरमन्दमिह राज्यमसौ भुनक्ति ॥ १३॥

आवाहनं यजनवर्णनमग्निहोत्रं

कर्मार्पणं तव विसर्जनमत्र देवि ।
मोहान्मया कृतमिदं सकलापराधं
मातः क्षमस्व वरदे बहिरन्तरस्थे ॥ १४॥

अन्तः स्थिताप्यखिल जन्तुषु जन्तुरूपा
विद्योतसे बहिरिवाखिल विश्वरूपा ।
का भूरिशब्दरचना वचनाधिका सा
दीनं जनं जननि मामव निष्प्रपञ्चम् ॥ १५॥

एतत्पठेदनुदिनं दनुजान्तकारि
चण्डीचरितमतुलं भुवि यस्त्रिकालम् ।
श्रीमान् सुखी स विजयी सुभगः कृती स्यात्
त्यागी चिरन्तनवपुः कवि चक्रवर्ती ॥ १६॥

इति ।

Sarthal or Shristhala devi or aShTAdashabhUjA devI is worshipped in Kishtavad (kishtwar, kaShTavArakaH deshaH) in Haryana

Encoded and proofread by Vani V

*Shristhala Devi Arati*

pdf was typeset on October 31, 2020

Please send corrections to *sanskrit@cheerful.com*